सोर्णाकर्षण- भैरव- मन्त्र

ब्रह्मा यस्या ऋषि स्वयं निगदित-श्छन्दो मतं त्रैष्टुभं ,
स्वर्णाकर्षण-भैरवो हरिहर-ब्रह्मात्मको देवता ।
ह्रीं बीजं भृगुशक्तिरित्यभिहितं, तस्यैव सूत्रात्मनः ,
स्तोत्रं ध्यानपुरसरं मनुमयं, भ्रूमो वयं प्रत्यहम् ॥१॥
मन्दारद्रुममूलपूजितमहा- माणिक्य -सिंहासने ,
संविष्टो दरभिन्न चम्पकरुचा, देव्या समालिंगितः ।
भक्तेभ्यो वररत्न पात्र भरितं ,स्वर्णं ददानोऽनिशं ,
स्वर्णाकर्षण-भैरवो विजयते, स्वर्णपवर्गाप्रदः ॥२॥
ॐ ऐं क्लां क्लीं क्लूंमिति व्याहरन्, यो भक्तः स्वर्णाकषंणं ।
कारुण्यब्धिःकल्पमूलादिवासः, स्वर्णाकर्षो भैरवो मेऽस्तु भूत्यै ॥३॥
ह्रां ह्री ह्रू सः सन्ततं जापकानां, वर्षतं तं स्वर्णवृष्टिं समग्राम् ।

अन्त स्वान्तं सूर्यकोटिप्रकाशं, स्वर्णाकर्षं भैरवं भावयामि ॥४॥

मकरतमणिपात्रे संभूतं स्वर्णपूर्ण, कृपणतरजनेभ्यस्तारतः सम्प्रदातुः । कुरु ह्रिदय सपर्या सेवमानाय नित्यं, सुरवरमनुजेन्द्र स्यापदुद्धरणाय ॥५॥ नमोऽजामलबद्धाय, ब्रह्मसूत्राधिवाससे ।

सोर्णकर्षण-शीलाय, साधकानां कृतात्मजे ॥६॥

लोकेश्वराद्यर्चित-पादुकाय , दारिद्र्यनिर्मूलनकारणाय । स्वर्णादि दानकरणो द्यतभैरवाय, कारुण्यवारांनिधये नमस्ते ॥७॥

दिनानाथ विपन्नरक्षणपरै राज्यप्रतिक्षापरैः ,

सिद्धैः साध्यगणैः सुरासुरगणै,र्भुक्तिप्रयुक्तान्मभिः ।

मूले कल्पतरोर्महामणिमये, मार्तण्ड-तेजोजुषे,

स्वर्णाकर्षणाभैरवाय सततं, कुर्मोनमस्यां वयम् ॥८॥
स्वर्णाकर्षि स्वर्णादेव्याश्रिताय , स्वर्णारूढोदार-सिंहासनाय । कुर्मो नित्यं स्वर्णदात्रे नमस्यां,द्यारिद्रयद्वेषि श्रीमते भैरवाय ॥९॥
स्वर्णप्रदानध्वरदीक्षिताय , स्वतेजसा क्रान्त जगत्त्रयाय ।
औदार्य संपत् सदनायनित्यम् , ॐ श्रीमहाभैरवाय ते नमोस्तु ॥१०॥ चिन्तामणिस्थित- महानिधि- कामधेनुं-,
मन्दारमूल-मणिमण्डप-मध्यगाय ।
स्वर्ण-प्रदान- निरताय सवासपर्या ,
कुर्मो वयं विकरणै परभैरवाय ॥११॥
मूलेकल्पतरोः प्रभा-परिमले, भद्रासने संस्थितो ,
हस्ताम्भोरुह-रत्नपात्रभरितैः, कार्तस्वरैर्भास्वरैः ।
निर्मूलिकृत-दुर्गतो विरचयन्, विद्युद्दिनेशद्युतिः ,

स्वर्णाकर्षण-भैरवो भवतु नो, दारिद्रय विद्वेषणः ॥१२॥
दुग्धाद्याराध्य स्वर्णाकृति कनकमये, द्विपवर्ये सुधाब्धौ ,
कपित्थेतत्र रम्ये मणिमयविलसद् ,मित्ति-पाश्चात्य भागे ।
यद्वत्तं सर्ववान्छाधिकवसुनिचयं ,मत्रिणां संसरन्त ,
ध्यायेच्छ्री भैरवं तं सकल-सुवसुदं, दुःखदारिद्रय शत्रुम् ॥१३॥
सुवर्णमण्डपे ध्यायेत् ,सुवर्णरुचिभिर्युतम् ।
महात्मानं सुखासिनं, प्रसन्नवरदायकम् ॥१४॥
सर्वरत्न-विभूषाढ्यं ,सुरासुर-नमस्कृतम् ।
मणिहारक-सपूर्ति ,ददतं स्वकरैःसदा ॥१५॥
सुवर्णवृष्टिरूपैश्च ,धनसारैर्निरन्तरम् ।
दारिद्रय-नाम-संहारं-कुण्डलोल्लास -संयुतम् ॥१६॥
एवं ध्यात्वा महात्मानं ,महादारिद्रय-नाशनम् ।

स्तौमि मन्दार-मुलस्थं ,ब्रह्मसुत्राधिवासनम् ॥१७॥
स्वर्णसिद्धि करैरेव, ददानं स्वर्णभैरवम् ।
ऋणंनजायते तस्य ,धनं शिघ्रमवाप्नुयात् ॥१८॥
स्वर्णादिमध्यमणिमण्डप ,कल्पवृक्षे ,
पीतारुणाम्वुजनिविष्ट,सुवर्णवर्णम् ।
माणिक्यपात्रमभयं ,दधतं च दोर्भ्यां
स्वर्णदिकर्षणविनोद-निधिं नमामि ॥१९॥
सुवर्णकर्षकं नित्यं ,ऋणहर्तारमीश्वरम् ।
भजतो न ऋणं तस्य, धनं शीघ्रं प्रजायते ॥२०॥
पीतवर्ण चतुर्वाहुं ,त्रिनेत्रं पीतवाससम्
अक्षद्वस्यं स्वर्णमयं ,तडित्पुरित-पात्रकम् ॥२१॥
अतितीक्ष्ण-महाशूलं , तोमरं चामरद्वयम् ।

सततं चिन्तयेद् यस्तु ,भैरवं स्वर्णसिद्धिदम् ॥२२॥
स्वर्णाकर्षणभैरव-मन्त्राढ्यं स्तोत्रमुत्तमम् ।
पठतां निधिसिद्धिश्च, स्वर्णसिद्धिश्च जायते ॥२३॥
अनेन स्तवराजेन नित्यं ब्रह्महरीश्वराः ।
स्वर्णाकर्षणनामानी ,स्तुवन्ति जगदीश्वरा ॥२४॥
यः पठेत् परमं स्तोत्रं-मिदं नित्यंनरोत्तमः ।
स मर्त्यो मन्दभाग्योऽपि-भैरवस्य प्रसादतः ॥२५॥
इच्छातोपिऽप्यधिकां लक्ष्मी ,लभतेनात्र संशयः ॥
रससिद्धिर्भवेच्छिघ्रं, निधिनामधिपोभवेत् ॥२६॥
सर्वान् कामानवाप्नोति ,दैवतैरपिदुर्लभम् ।
एतजपैर्महालक्ष्मी-श्चञ्चलाप्यचलाभवेत् ॥२७॥
रत्नान्यश्वान् गजान् भूती-र्लभते शीघ्रमेव हि ।

स्वर्णराशिमवाप्नोति, चाक्षयां नात्र संशय ॥२८॥
धेनु चिन्तामणिं कल्प,द्रुमं शीघ्रमवाप्नुयात् ।
नित्यमष्टोत्तरशतं, यो जपेत् तोत्रमुत्तमम् ॥२९॥
मण्डलाधच्चि प्रागेव, स्वर्णराशिमनुत्तमम् ।
सततं ध्याते तस्मै, दर्शयत्यव न संशयः ॥३०॥
नित्यं च त्रिपुराभक्तैः ,स्वर्णाकर्षणभैरवः ।
यत्नेन सर्वदोपास्य, सर्वकामप्रदायकः ॥३१॥

इति श्रीत्रिपुरासिद्धान्ते दक्षिणामूति प्रोक्तं स्वणकर्षणभैरवस्तोत्रं संपुर्णम् ।

अन्नंब्रह्मा रसोविष्णु र्भोक्तादेवो महेश्वर ।
एवं ध्यात्वातुयोभुङ्ते सोऽन्न दोषै र्नलिप्यते ॥१२॥
अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोपादोदकंपित्वा पुनर्जन्म नविद्यते ॥१३॥

अच्युतानन्त गोविन्द नामोच्चारण भेषजात् ।
नश्यन्तिसकलारोगाः सत्यंसत्यं बदाम्यहम् ॥१४॥
धन्वन्तरिर्वृकोदासः काशीराजश्च वीर्यवान् ।
नकुलः सहदेवस्च पञ्चैते ब्याधिघातकाः ॥१५॥
अश्वत्थमेकं पिचुमंदमेकं न्यग्रोधमेकं दशतिंतिणीकं ।
कपित्थबिल्वा मलकंत्रयंच पंचाम्रवापी नरकंनपश्यत् ॥१६॥
वरंभूमि रुहाःपंच नतुकोष्ठ रुहादश ।
पत्रैःपुष्पैःफलैर्मूलै कुर्वंतिपितृतर्पणम् ॥१७॥
नपश्यंति यमंवैश्य तुलसीवनरोपणात् ।
सर्वपापहरंपुण्यं कामदंतुलसीवनम् ॥२१॥
तुलसीकाननं वैश्य गृहेयस्मिंश्च तिष्ठति ।
तद्गृहं तीर्थभूतंहि नोयांतियमकिंकराः ॥२२॥

तावद्वर्ष सहस्त्राणि यावद्विजदलानिच ।
वसंतिदेवलोके ते तुलसीरोपयंतिये ॥२३॥
तुलसीगंधमाघ्राय पितरस्तुष्टमानसाः ।
प्रयान्ति गरुडारुडा भवनंचक्रपाणिनः ॥२४॥
दर्शनंनर्वदायास्तु गंगास्नानंविशांवर ।
तुलसीवनसंस्पर्शः सममेतत्रयंस्मृतम् ॥२५॥
रोपणात्पालनात्सेका द्दर्शनात्स्पर्शनान्नृणाम् ।
तुलसीदहतेपापं वांङ्मनःकाय संचितम् ॥२६॥
पक्षेपक्षेतु संप्राप्ते द्वादश्यांवैश्यसत्तम ।
ब्रह्मादयोपि कुर्वन्ति तुलसीवन पूजनम् ॥२७॥
मणिकाञ्चनपुष्पाणि तथामुक्ताफलानिच ।
तुलसीयत्र पूजायाःकलांनार्हन्ति षोडशीम् ॥२८॥

आभ्ररोपसहस्राण पिपलानांशतेनच ।
यत्फलंहितदेकेन तुलसीविटपे नच ॥२९॥
विष्णुपूजनसंसक्त स्तुलसींयस्तुरोपयेत् ।
युगायुतं दशैकंचरोपकोर मतेदिवि ॥३०॥
तुलसीमंञ्जरीभिस्तु कुर्याद्धरिहरार्चनम् ।
नसगर्भगृहंयाति मुक्तिभागीभवेन्नरः ॥३१॥
पुस्करादिनितीर्थानि गंगाद्याःसरितस्तथा ।
वाशुदेवादयोदेवा वसंतितुलसीदले ॥३२॥
आरोप्य तुलसींवैश्य संपूज्यतद्दलैर्हरिम् ।
वसंतिमोदमानास्तेयत्रदेव श्चतुर्भुजः ॥३३॥